**SET-4**

**Series ΩQAΩA/C**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **9** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **9** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **9** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **9** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम्

# SANSKRIT

*अवधि : होराद्वयम्*
*निर्धारित समय : 2 घण्टे*
*Time allowed : 2 hours*

*पूर्णाङ्काः : 40*
*अधिकतम अंक : 40*
*Maximum Marks : 40*

***सामान्य निर्देशा :***

*अधः प्रदत्तनिर्देशान् सावधानतया पठत अनुसरत च ।*

1. *प्रश्नपत्रमिदं विषयवस्तुदृष्ट्या विभागत्रये वर्तते – अपठित-अवबोधनम्, रचनात्मक लेखनम्, पठितावबोधनम् च ।*
2. *भाग 'अ' अपठित-अवबोधनस्य प्रश्ने विषयवस्तुदृष्ट्या चत्वारो भागाः सन्ति । प्रत्येकं विभागे प्रदत्तप्रश्नेषु स्वेच्छया यथारुचि चयनं कृत्वा निर्देशानुसारम् उत्तरत ।*
3. *भाग 'ब' रचनात्मक लेखनम् अस्ति । अस्मिन् भागे त्रयः प्रश्नाः सन्ति । विषयवस्तुदृष्ट्या यथानिर्देशं प्रश्नान् उत्तरत ।*
4. *भाग 'स' अत्र पाठ्यपुस्तकमधिकृत्य पञ्च प्रश्नाः प्रदत्ताः सन्ति । तथापि यथारुचि यथानिर्देशं चयनं कृत्वा प्रश्नान् उत्तरत ।*
5. *अस्मिन् प्रश्नपत्रे नव प्रश्नाः सन्ति । सर्वे समाधेयाः ।*

***General Instructions :***

*Read the following instructions carefully and follow :*

1. *This question paper contains three sections – Unseen Passage, Writing Skill and Text-books.*
2. *Section A (Unseen Passage) contains four parts and attempt all parts with choice as given there, based on specific instructions given in the question itself.*
3. *Section B (Writing Skill) contains three questions. Attempt all three questions based on specific instructions given in the question itself.*
4. *Section C (Text Books Based Question) contains five main questions with choice as per the instructions given in the question itself.*
5. *This question paper contains nine questions. Answer all questions.*

## खण्डः क

## वर्णनात्मकाः प्रश्नाः

## अपठित-अवबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

"शरीरमाद्यं खलु धर्मसाधनम्" अर्थात् शरीरम् एव सर्वेषां कर्तव्यानां प्रमुखं साधनं वर्तते । वयं सर्वाणि कार्याणि शरीरेण एव कर्तुं सक्षमाः । यद्यपि सामाजिकम्-धार्मिकम्-राजनैतिकम्-पारिवारिकम्-वैयक्तिककार्याणि च अपि शरीरेण एव भवन्ति परं तथापि वयम् अस्य एव

अवहेलनां कुर्मः । अद्य जनाः स्वकार्येषु अत्यधिकं निमग्नाः सन्ति । अतः ते स्वशरीरं प्रति पूर्णतः उदासीनाः दृश्यन्ते । ते न तु समयेन खादन्ति, न पिबन्ति, न व्यायामं कुर्वन्ति, न विश्रामं कुर्वन्ति । वस्तुतः ते स्वस्थं भवितुं किमपि न कुर्वन्ति, केवलं धनं प्राप्तुं व्यग्राः दृश्यन्ते । एतदर्थमेव ते अधुना शरीरेण स्वस्थाः न सन्ति अपितु तेषां शरीरं रोगाणां गृहम् अस्ति । अतः इदम् अस्माकं कर्तव्यं यत् वयं स्वास्थ्यं प्रति जागरूकाः भवेम ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) *2×1=2*

(i) शरीरं केषां प्रमुखं साधनम् अस्ति ?

(ii) सर्वाणि कार्याणि केन कर्तुं सक्षमाः ?

(iii) जनाः किं प्राप्तुं व्यग्राः दृश्यन्ते ?

(ब) पूर्णवाक्येन लिखत । (केवलं प्रश्नद्वयम्) *2×2=4*

(i) कानि कानि कार्याणि शरीरेण एव भवन्ति ?

(ii) जनाः कं प्रति पूर्णतः उदासीनाः सन्ति ?

(iii) अस्माकं किं कर्तव्यम् ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । *1*

(द) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'भवेम' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'कार्याणि' इति पदस्य विशेषणं गद्यांशात् चित्वा लिखत ।

(iii) 'समर्थाः' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(iv) अनुच्छेदे 'जागरूकाः' पदस्य कः विपर्ययः आगतः ?

## खण्डः ख

## रचनात्मक-लेखनम्

**2.** भवान् निपुणः । भवतः मित्रम् अथर्वः चलभाषियन्त्रस्य प्रयोगम् अत्यधिकं करोति । अस्य दुष्परिणामान् ज्ञापयता लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु । $10\times\frac{1}{2}=5$

92, विज्ञान विहारः

नवदिल्लीतः

दिनाङ्कः ___________

प्रिय मित्र (i) ___________ !

सप्रेम नमोनमः ।

अत्र कुशलं (ii) ___________ । अधुना अहम् (iii) ___________ यत् भवान् अत्यधिकं चलभाषियन्त्रे (iv) ___________ एव दृश्यते । एतत् न उचितम् । अनेन तु (v) ___________ हानिः भवति । कक्षायाः पश्चात् अस्य (vi) ___________ अति न्यूनः भवितव्यः । अस्य अतिप्रयोगः स्वस्थाय नोचितं वर्तते । (vii) ___________ दृष्टि कृते तु इदं शत्रुः इव । अहं मन्ये अधुना (viii) ___________ अस्य प्रयोगम् आवश्यकतानुसारम् एव करिष्यसि, स्वाध्ययनं प्रति च सचेष्टः भविष्यसि ।

(ix) ______________ प्रति सादरं प्रणामाः ।


भवदीयं (x) ______________

निपुणः

**मञ्जूषा**

| |
|---|
| सक्रियः, त्वम्, मातापितरौ, अनुभवामि, मित्रम्, प्रयोगः, तत्रास्तु, अथर्व, अमूल्यसमयस्य, नेत्राणाम् । |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत : *5×1=5*



**मञ्जूषा**

| |
|---|
| पुस्तकानि, चतस्रः, पठन्ति, आसन्दिकायाम्, ध्यानेन, पुस्तकालयम्, सुसज्जितम्, वर्तते, द्वौ, संगणकम्, बालौ, पुस्तकालयाध्यक्षः, एका, शान्तम् । |

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत : *5×1=5*

**'अध्ययनस्य महत्वम्'**

**मञ्जूषा**

| |
|---|
| ज्ञानम्, भवति, सम्मानम्, अपि, सर्वत्र, धनम्, अर्जयितुम्, विद्यया, शब्दकोशः, च, सन्ति, जनाः, कुर्वन्ति, विदुषाम्, पराजितः । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत : (केवलं वाक्य**पञ्च**कम्) *5×1=5*

(i) विद्या के बिना जीवन व्यर्थ है ।
Life is futile without knowledge.

(ii) मेरी माता भोजन पकाती है ।
My mother cooks food.

(iii) मित्र की सहायता करनी चाहिए ।
A friend should be helped.

(iv) तुम दुकान से दूध लाओ ।
Bring milk from the shop.

(v) तुम अपना कार्य कब करोगे ?
When will you do your work ?

(vi) किसान कल गाँव गए थे ।
Farmers went to village yesterday.

(vii) मोहन चतुर बालक है ।
Mohan is a clever boy.

## खण्डः ग

## पठितावबोधनम्

**5.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *3*

अग्रिम दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान् । न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक् पृथक् विवरणं श्रुतवान् । सर्व वृत्तमवगत्य सः तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम् । किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत् । ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान् । अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं स्थापितवन्तौ । तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः । तस्य मृतशरीरं राजमार्गम् निकषा वर्तते । आदिश्यतां किं करणीयमिति । न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) न्यायाधीशस्य नाम किम् ?

(ii) न्यायाधीशः तम् अतिथिं कीदृशम् अमन्यत ?

(iii) तौ कुत्र स्व स्व पक्षं स्थापितवन्तौ ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) न्यायाधीशः आरक्षिणम् अभियुक्तं च किम् आदिष्टवान् ?

(ii) तत्रत्यः कर्मचारी किं न्यवेदयत् ?

(iii) न्यायाधीशः किमर्थं निर्णेतुं नाशक्नोत् ?

**6.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 3

उदीरितोऽर्थः पशुनापि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः ।
अनुक्तमप्यूहति पण्डितो जनः,
परेङ्गितज्ञानफला हि बुद्धयः ।।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) उदीरितोऽर्थः केन गृह्यते ?

(ii) हयाः भारं किं कुर्वन्ति ?

(iii) कः अनूक्तम् अपि ऊहति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) पशुना कीदृशः अर्थः गृह्यते ?

(ii) के के बोधिताः वहन्ति ?

(iii) बुद्धयः कीदृश्यः भवन्ति ?

**7.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : 3

(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं श्रुणुतः वदतः च)

*व्याघ्रचित्रकौ* – अरे किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ । यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मतया ।

*सिंहः* – तूष्णीं भव भोः । युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ । एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति ।

*बकः* – सर्वथा सम्यगुक्तम् सिंहमहोदयेन । वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यस्यापि अवकाशः एव नास्ति ।

*सर्वे पक्षिणः (उच्चैः)* – आम् आम् – कश्चित् खगः एव वनराजः भविष्यति इति ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) कौ नदीजलं पातुमागतौ ?

(ii) 'तूष्णीं भव' इति कः कथयति ?

(iii) किमर्थं सुपात्रं चीयते ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) वन्यजीवाः कं रक्षकपदयोग्यं न मन्यन्ते ?

(ii) कुत्र संशीतिलेशस्यस्यापि अवकाशः एव नास्ति ?

(iii) सर्वे पक्षिणः उच्चैः किं कथयन्ति ?

**8.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत : $4\times\frac{1}{2}=2$

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

**अन्वयः –**

फलच्छायासमन्वितः (i) _________ सेवितव्यः । (ii) _________ यदि फलं (iii) _________ (वृक्षस्य) (iv) _________ केन निवार्यते ।

**मञ्जूषा**

| |
|---|
| छाया, महावृक्षः, नास्ति, दैवात् । |

**अथवा**

मञ्जूषायाः साहाय्येन प्रदत्तश्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा तं पुनः लिखत : $4\times\frac{1}{2}=2$

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥

**भावार्थः –**

अस्य भावोऽस्ति यत् यः नरः सत्यां धर्मयुक्ताम् (i) _________ त्यक्त्वा (ii) _________ वाचं वदेत् सः (iii) _________ पक्वं फलं त्यक्त्वा (iv) _________ फलं खादति अर्थात् तस्य नरस्य वाण्यां सरसता मधुरता न भवति ।

**मञ्जूषा**

| |
|---|
| कठोराम्, वाणीम्, अपक्वम्, बुद्धिहीनः |

**9.** अधोलिखित-कथांशं समुचित-क्रमेण लिखत : $8 \times \frac{1}{2} = 4$

(i) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः ।

(ii) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वा अभर्त्सयन् ।

(iii) सः पुत्रं द्रष्टुं पदातिरेव प्राचलत् ।

(iv) कश्चन निर्धनः जनः वित्तम् उपार्जितवान् ।

(v) तस्मिन् गृहे कश्चन चौरः गृहाभ्यान्तरे प्रविष्टः ।

(vi) सः रात्रिनिवासं कर्तुम् एकं गृहम् उपागतः ।

(vii) छात्रावासे निवसन् एकदा तस्य पुत्रः रुग्णः जातः ।

(viii) चौरः एव उच्चैः क्रोशितुमारभत ।